# NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 4-शिशुलालनम्

IndCareer
Schools
indCareer indCareer indCareer

# NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 4-शिशुलालनम्

Class 10: Sanskrit (Shemushi) Chapter 4 solutions. Complete Class 10 Sanskrit (Shemushi) Chapter 4 Notes.

## NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 4-शिशुलालनम्

NCERT 10th Sanskrit (Shemushi) Chapter 4, class 10 Sanskrit (Shemushi) Chapter 4 solutions

**प्रश्न 1.**

https://www.indcareer.com/schools/ncert-solutions-for-class-10-sanskrit-shemushi-chapter-4-shishulalanam/

एकपदेन उत्तरं लिखत-

(क) कुशलवौ कम् उपसृत्य प्रणमतः?

उत्तराणि:

रामम्

(ख) तपोवनवासिनः कुशस्य मातरं कंन नाम्ना आह्वयन्ति?

उत्तराणि:

देवीति

(ग) वयोऽनुरोधात् कः लालनीयः भवति?

उत्तराणि:

शिशुः

(घ) केन सम्बन्धन वाल्मीकि: लवकुशयो: गुरुः

उत्तराणि:

उपनयनोपदेशन

(ङ) कुत्र लवकुशायाः पितुः नाम न व्यवाह्रियत?

उत्तराणि:

तपोवने

प्रश्न 2.

अधोलिखिताना प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-

(क) रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत्?

उत्तराणि:

रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः हृदयग्राही आसीत्।

(ख) रामः लवकुशौ कुत्र उपवेशयितुम् कथयति?

उत्तराणि:

रामः लवकुशौ अङ्कम् सिंहासनम् उपवेशयितुम् कथयति।

(ग) बालभावात् हिमकरः कुत्र विराजते?

उत्तराणि:

बालभावात् हिमकरः पशुपति-मस्तके विराजते।

(घ) कुशलवयोः वंशस्य कर्ता क?

उत्तराणि:

कुशलवयोः वंशस्य कर्ता सहनदीधितिः।

(ङ) कुशलवयोः मातरं वाल्मीकि: केन नाम्ना आह्वयति?

उत्तराणि:

कुशलवयोः मातरं वाल्मीकिः वधूः नाम्ना आह्वयति।

**प्रश्न 3.**

रेखाङ्कितेषु पदेषु विभक्तिं तत्कारणं च उदाहरणानुसार निर्दिशत-

| | | विभक्तिः | तत्कारणम् |
|---|---|---|---|
| यथा– | राजन्! अलम् अतिदाक्षिण्येन। | तृतीया | 'अलम्' योगे |
| (क) | रामः लवकुशौ आसनार्धम् उपवेशयति। | .................. | .................. |
| (ख) | धिङ् माम् एवं भूतम्। | .................. | .................. |
| (ग) | अङ्कव्यवहितम् अध्यास्यतां सिंहासनम्। | .................. | .................. |
| (घ) | अलम् अतिविस्तरेण। | .................. | .................. |
| (ङ) | रामम् उपसृत्य प्रणम्य च। | .................. | .................. |

उत्तराणि:

(क) 'उपवेशयति' इति पदस्य कारणेन द्वितीया विभक्तिः अस्ति।

(ख) "धिङ् (धिक्)' अव्यय कारणेन द्वितीया विभक्तिः अस्ति।

(ग) 'अध्यास्यताम्' इति पदस्य कारणेन द्वितीया विभक्तिः अस्ति।

(घ) 'अलम्' अव्यय कारणेन तृतीया विभक्तिः अस्ति।

(ङ) 'उपसृत्य' इति पदस्य कारणेन द्वितीया विभक्तिः अस्ति।

प्रश्न **4.**

यथानिर्देशम् उत्तरत**-**

(क) 'जानाम्यहं तस्य नामधेयम्' अस्मिन् वाक्ये कर्तृपदं किम्?

उत्तराणि:

अहम्

(ख) 'किं कुपिता एवं भणति उत प्रकृतिस्था'-अस्मात् वाक्यात् 'हर्षिता' इति पदस्य विपरीतार्थकपदं चित्वा लिखत।

उत्तराणि:

कुपिता

(ग) विदूषकः (उपसृत्य) 'आज्ञापयतु भवान्!' अत्र 'भवान्' इति पद कस्मै प्रयुक्तम्?

उत्तराणि:

रामाय

(घ) 'तस्मादङ्-व्यवहितम् अध्यास्याताम् सिंहासनम्'-अत्र क्रियापदं किम्?

उत्तराणि:

अध्यास्याताम्

(ङ) 'वयसस्तु न किञ्चिदन्तरम्'-अत्र 'आयुषः' इत्यर्थे किं पदं प्रयुक्तम्?

उत्तराणि:

वयसः

**प्रश्न 5.**

अधोलिखितानि वाक्यानि कः कं प्रति कथयति-

| | कः | कम् |
|---|---|---|
| (क) सव्यवधानं न चारित्र्यलोपाय। | ........................ | ........................ |
| (ख) किं कुपिता एवं भणति, उत प्रकृतिस्था? | ........................ | ........................ |
| (ग) जानाम्यहं तस्य नामधेयम्। | ........................ | ........................ |
| (घ) तस्या द्वे नाम्नी। | ........................ | ........................ |
| (ङ) वयस्य! अपूर्वं खलु नामधेयम्। | ........................ | ........................ |

उत्तराणि:

| | कः | कम् |
|---|---|---|
| (क) सव्यवधानं च चारित्र्यलोपाय। | रामः | उभौ (कुशलवौ) |
| (ख) किं कुपिता एवं भणति, उत प्रकृतिस्था? | विदूषकः | कुशम् |
| (ग) जानाम्यहं तस्य नामधेयम्। | कुशः | रामम् |
| (घ) तस्या द्वे नाम्नी। | लवः | विदूषकम् |
| (ङ) वयस्य! अपूर्वं खलु नामधेयम् | रामः | विदूषकम् |

NCERT 10th Sanskrit (Shemushi) Chapter 4, class 10 Sanskrit (Shemushi) Chapter 4 solutions

**प्रश्न 6(अ).**

मञ्जूषातः पर्यायद्वयं चित्वा पदानां समक्षं लिखत-

| | | | | | |
|---|---|---|---|---|---|
| शिवः | शिष्टाचारः | शशिः | चन्द्रशेखरः | सुतः | इदानीम् |
| अधुना | पुत्रः | सूर्यः | सदाचारः | निशाकरः | भानुः |

(क) हिमकरः – ................ ................

(ख) सम्प्रति – ................ ................

(ग) समुदाचारः – ................ ................

(घ) पशुपतिः – ................ ................

(ङ) तनयः – ................ ................

(च) सहस्रदीधितिः – ................ ................

**उत्तराणि:**

(क) शशिः, निशाकरः

(ख) इदानीम्, अधुना

(ग) शिष्टाचारः, सदाचारः

(घ) शिवः, चन्द्रशेखरः

(ङ) पुत्रः, सुतः

(च) सूर्यः, भानुः

प्रश्न **6(आ).**

विशेषण-विशेष्यपदानि योजयत-

| यथा–विशेषण पदानि | | विशेष्य पदानि |
|---|---|---|
| श्लाघ्या | – | कथा |
| (1) उदात्तरम्यः | | (क) समुदाचारः |
| (2) अतिदीर्घः | | (ख) स्पर्शः |
| (3) समरूपः | | (ग) कुशलवयोः |
| (4) हृदयग्राही | | (घ) प्रवासः |
| (5) कुमारयोः | | (ङ) कुटुम्बवृत्तान्तः |

उत्तराणि**:**

(1) उदात्तरम्यः – (क) समुदाचारः

(2) अतिदीर्घः – (घ) प्रवासः

(3) समरूपः – (ङ) कुटुम्बवृत्तान्तः

(4) हृदयगाही – (ख) स्पर्शः

(5) कुमारयोः – (ग) कुशलवयोः

प्रश्न **7(अ).**

अधोलिखितपदेषु सन्धिं कुरुत-

(क) द्वयोः + अपि – __________

(ख) द्वौ + अपि – __________

(ग) कः + अत्र – __________

(घ) अनभिज्ञः + अहम् – __________

(ङ) इति + आत्मानम् – __________

उत्तराणि:

(क) द्वयोरपि

(ख) द्वावपि

(ग) कोऽत्र

(घ) अनभिज्ञोऽहम्

(ङ) इत्यात्मानम्

**प्रश्न 7(आ).**

अधोलिखितपदेषु विच्छेदं कुरुत-

(क) अहमप्येतयोः – __________

(ख) वयोऽनुरोधात् – __________

(ग) समानाभिजनौ – __________

(घ) खल्वेतत् – __________

उत्तराणि:

(क) अहम् + अपि + एतयो:

(ख) वयः + अनुरोधात्

(ग) समान + अभिजनौ

(घ) खलु + एतत्

योग्यताविस्तारः

यह पाठ संस्कृतवाङ्मय के प्रसिद्ध नाटक 'कुन्दमाला' के पंचम अंक से सम्पादित कर लिया गया है। इसके रचचिता प्रसिद्ध नाटककार दिङ्नाग है। इस नाटकांश मे राम कुश और लव को सिंहासन पर बैठाना चाहते है। किन्तु वे दोनों अतिशालीनतापूर्वक मना करते हैं। सिंहासनारूढ राम कुश और लव के सौन्दर्य से आकृष्ट होकर उन्हें अपनी गोद में बिठा लेते हैं। और आनन्दित होते हैं। पाठ में शिशु स्नेह का अत्यन्त मनोहारी वर्णन किया गया है।

नाट्य-प्रसङ्गः

कुन्दमाला के लेखक दिङ्नाग ने प्रस्तुत नाटक में रामकथा के करुण अवसाद भरे उत्तरार्ध की नाटकीय सम्भावनाओं को मौलिकता से साकार किया है। इसी कथानक पर प्रसिद्ध नाटककार भवभूति का उत्तररामचरित भी आश्रित है। कुन्दमाला के छहों अड़ों का दृश्यविधान वाल्मीकि-तपोवन के परिसर में ही केन्द्रित है। प्रस्तुत नाटकांश पञ्चम अङ्क से सम्पादित कर सङ्कलित किया गया है। लव और कुश से मिलने पर राम के हृदय में उनसे आलिंगन की लालसा होती है। उनके स्पर्शसुख से अभिभूत हो राम, उन्हें अपने सिंहासन पर, अपनी गोद में बिठाकर लाड़ करते हैं। इसी भाव की पुष्टि में नाटक में यह श्लोक उद्धत है-

भवति शिशुजनो वयोऽनुरोधाद् गुणमहतामपि लालनीय एव।

व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम्।।

शिशुस्नेहसमभावश्लोकाः

अनेन कस्यापि कुलाकुरेण स्पृष्टस्य गात्रेषु सुख ममैवम्।

का निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमकात् कृतिनः प्ररूढः।। (कालिदासः)

अन्त:करणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।

आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते।। (भवभूति:)

धूलीधूसरतनवः क्रीडाराज्ये स्वके च रममाणाः।

कृतमुखवाद्यविकाराः क्रीडन्ति सुनिर्भर बालाः।। (अज्ञातकवि:)

अनियतरुदित स्मित विराजत् कतिपयकोमलदन्तकुड्मलाग्रम्।

वदनकमलकं शिशोः स्मरामि स्खलदसमञ्जसमजुजल्पितं ते।। (अज्ञातकवि:)

NCERT 10th Sanskrit (Shemushi) Chapter 4, class 10 Sanskrit (Shemushi) Chapter 4 solutions

**Additional Important Questions and Answers**

अतिरिक्त प्रश्नाः

**1.** गद्यांशान् पठित्वा प्रश्नान् उत्तरत**-**

(क) (सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसी कुशलवी)

विदूषकः – इत इत आर्यो!

कुशलवी – (रामस्य उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?

रामः – युष्मदर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनस. चतस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

उभौ – राजासनं खल्वेतत्, न युक्तमध्यासितुम्।

रामः – सव्यवधानं न चारित्रलोपाय। तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम्। (अङ्कमुपवेशयति)

उभौ -(अनिच्छा नाटयतः) राजन्!

अलमतिदाक्षिण्येन।

रामः – अलमतिशालीनतया।

प्रश्न **1.**

एकपदेन उत्तरत **(**केवलं प्रश्नद्वयमेव**)-**

1. सिंहासने कः स्थ?

2. कुशलवौ कस्य समीपम् अगच्छताम्?
3. किं न युक्तम्?

उत्तराणि:

1. रामः
2. रामस्य
3. अध्यासितुम्

**प्रश्न 2.**

**पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. कस्य स्पर्शः रामाय हृदयग्राही आसीत्?
2. सव्यवधानं कस्मै न भवति?

उत्तराणि:

1. कुशलवयोः स्पर्शः रामाय हृदयग्राही आसीत्।
2. सव्यवधान चारित्रलोपाय न भवति।

**प्रश्न 3.**

**भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. अत्र 'उभौ' शब्दः काभ्याम् प्रयुक्तः?
2. 'पात्रम्' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?
3. 'तापसौ कुशलवौ' अत्र विशेषणपदं किम्?
4. नाट्यांशे 'नत्वा' इति पदस्य कः पर्यायः आगतः?

उत्तराणि:

1. लवकुशाभ्याम्
2. भाजनम्
3. तापसौ
4. प्रणम्य

(ख) भवति शिशुजनो वयोऽनुरोधाद्

गुणमहतामपि लालनीय एव।

व्रजति हिमकरोऽपि बालभावात्

पशुपति-मस्तक-केतकच्छदत्वम्॥

NCERT 10th Sanskrit (Shemushi) Chapter 4, class 10 Sanskrit (Shemushi) Chapter 4 solutions

प्रश्न **1.**

एकपदेन उत्तरत **(**केवलं प्रश्नद्वयमेव**)-**

1. कः लालनीयः एव भवति?
2. किमर्थम् हिमकरः पशुपति-मस्तके विराजते?
3. शिशुजनः कथं लालनीयः भवति?

उत्तराणि**:**

1. शिशुजनः
2. बालभावात्
3. वयोऽनुरोधाद्

प्रश्न **2.**

पूर्णवाक्येन उत्तरत **(**केवलं प्रश्नमेकमेव**)-**

1. हिमकरः कीदृशम् इव पशुपति-मस्तके विराजते?
2. हिमकरे कीदृशो भावते भवति?

उत्तराणि**:**

1. हिमकर: बालभावात् पशुपति मस्तके केतकछेदत्वम् इव विराजते।
2. हिमकरे बालभावो भवति।

**प्रश्न 3.**

**भाषिककार्यम् (केवलं प्रश्नत्रयमेव)**

1. 'शिशुजनः' इति कर्तृपदस्य क्रियापदं किम्?
2. 'विराजते' इति क्रियायाः श्लोके पर्यायः कः?
3. अस्मात् श्लोकात् एकम् अव्यय-पदं लिखत
4. श्लोके 'ताडनीयः' इत्यस्य पदस्य कः विपर्ययः आगतः?

**उत्तराणि:**

1. लालनीयः
2. व्रजति
3. अपि
4. लालनीयः

**(ग)** रामः **–** एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि**-**क्षत्रियकुल**-**पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता**?**

लवः – भगवन् सहस्रदीधितिः।

रामः – कथमस्मत्समानाभिजनौ संवृत्तौ?

विदूषकः – किं द्वयोरप्येकमेव प्रतिवचनम्?

लवः – भ्रातरावावां सोदर्यौ।

रामः – समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः – आवां यमलौ।

रामः – सम्प्रति युज्यते। किं नामधेयम्?

लवः – आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम्..........

कुशः – अहमपि कुश इत्यात्मान श्रावयामि।

**प्रश्न 1.**

एकपदेन उत्तरत **(केवलं प्रश्नद्वयमेव)-**

1. क्षत्रियकुलस्य पितामही कौ स्त:?
2. रामस्य वंशस्य कर्ता कः?
3. लवः कस्य वन्दनायाम् आत्मानं श्रावयति?

उत्तराणि:

1. सूर्यचन्द्रौ
2. सहनदीधितिः
3. आर्यस्य (रामस्य)

**प्रश्न 2.**

पूर्णवाक्येन उत्तरत **(केवलं प्रश्नमेकमेव)-**

1. कुशलवयोः मध्ये कीदृशी समानता आसीत्?
2. कुशलवौ कीदृशौ स्त:?

**उत्तराणि:**

1. कुशलवयोः मध्ये शरीरसन्निवेशस्य समानता आसीत्।
2. कुशलवौ सोदर्यौ यमलौ स्तः।

**प्रश्न 3.**

भाषिककार्यम् **(केवलं प्रश्नत्रयमेव)-**

1. अत्र 'युगलौ' इत्यर्थे किम् पदं प्रयुक्तम्?
2. अस्मात् गद्यांशात् 'भानुः' पदस्य पर्यायपदं लिखत-
3. नाट्याशे 'सौन्दर्यावलोकजनितेन' इति विशेषणस्य विशेष्यपदं किम्?
4. नाट्यांशे आगतस्य 'श्रावयामि' इति क्रियापदस्य कर्तृपद किम्?

**उत्तराणि:**

1. यमलौ
2. सहस्रदीधितिः
3. कौतूहलेन
4. अहम्

**(घ)** रामः **– अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोगुरुः?**

लवः – ननु भगवान् वाल्मीकिः।

रामः – केन सम्बन्धेन?

लवः – उपनयनोपदेशेन।

रामः – अहमत्रभवतो: जनकं नामतो वेदितुमिच्छामि।

लवः – न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

रामः – अहो महात्म्यम्।

कुशः – जानाम्यहं तस्य नामधेयम्।

रामः – कथ्यताम्।

कुशः – निरनुक्रोशो नाम....

रामः – वयस्य, अपूर्वं खलु नामधेयम्।

विदूषकः – (विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति क एवं भणति?

कुशः – अम्बा।

विदूषकः – किं कुपिता एवं भणति, उत प्रकृतिस्था?

कुशः – यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपति-निरनुक्रोशस्य पुत्री, मा चायलम् इति।

विदूषकः – एतयोर्यवि पितर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारको निर्भर्तयति।

प्रश्न **1.**

एकपदेन उत्तरत **(**केवलं प्रश्नद्वयमेव**)-**

1. कुशलवयोः गुरुः कः आसीत्?
2. क: लवकुशयोः 'जनक' नामतो वेदितुमिच्छति?
3. का रामं निरनुक्रोशः इति भणति?

उत्तराणि**:**

1. वाल्मीकिः
2. रामः
3. अम्बा (सीता)

प्रश्न **2.**

पूर्णवाक्येन उत्तरत **(**केवलं प्रश्नमेकमेव**)-**

1. लवकुशयोः अम्बा प्रति विदुषकः किम् अकथयत्?
2. कुशलवयोः गुरुः कः आसीत्?

उत्तराणि**:**

1. एतयोः यदि पितुरर्निरनक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारको निर्भर्त्सयति।
2. कुशलवयोः गुरुः भगवान् वाल्मीकिः आसीत्?

प्रश्न **3.**

भाषिककार्यम् **(**केवलं प्रश्नत्रयमेव**)-**

1. भगवान् वाल्मीकि:' अत्र विशेषणपदं किम्?
2. 'इच्छामि' इति क्रियायाः कर्तृपदं किम्?
3. 'कथयति' इति क्रियायाः गद्यांशे पर्यायः कः?
4. 'कः एवं भणति'। अत्र क्रियापदं किम्?

उत्तराणि**:**

1. भगवान्
2. अहम्
3. भणति
4. भणति

**(ङ) रामः – (स्वगतम्)** धिङ् मावेवं भूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगभैरक्षरैर्निर्भर्त्सयति। **(सवाष्पमवलोकयति)**

रामः – अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयो मतो वेवितुमिच्छामि। न युक्तं च स्वीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

विदूषकः – (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी?

लवः – तस्याः द्वे नामनी।

विदूषकः – कथमिव?

लवः – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वालमीकिर्वधरिति।

रामः – अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः – (उपसृत्य) आज्ञापयतु भवान्।

रामः – अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः?

(नेपथ्ये)

इयती वेला सजाता रामायणगानस्य नियोगः किमर्थं न विधीयते?

उभौ – राजन्! उपाध्यायदूतोऽस्मान् त्वरयति।

रामः – मयामि सम्माननीय एव मुनिनियोगः। तथाहि-

प्रश्न **1.**

एकपदेन उत्तरत **(केवलं प्रश्नद्वयमेव)-**

1. कुशलवयोः मातरं तपोवनवासिनः केन नाम्ना आह्वयन्ति?
2. अयं प्रवासः कीदृशः आसीत्?
3. रामः सीतां केन विशेषणेन स्मरति?

उत्तराणि:

1. देवी
2. अतिदीर्घ:/दारुणः
3. तपस्विनी

प्रश्न **2.**

पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-

1. सा तपस्विनी केन अपराधेन कम् मन्युगर्भै; अक्षरैः निर्भर्त्सयति?
2. रामस्य कुमारयोश्च कुटुम्बवृत्तान्तः कीदृशः?

उत्तराणि:

1. सा तपस्विनी रामेण कृतेन अपराधेन स्वापत्यम् मन्युगर्भ: अक्षरैः निर्भर्त्सयति।
2. रामस्य कुमारयोश्च कुटुम्बवृत्तान्तः सर्वथा समरूपः

प्रश्न **3.**

भाषिककार्यम् (केवलं प्रश्नत्रयमेव)

1. 'दृष्ट्वा' इत्यर्थे किम् पदम् अत्र प्रयुक्तम्?
2. 'समयः' इत्यस्य कः पर्यायः अत्र लिखितः?
3. 'समरूपः कुटुम्बवृत्तान्तः' अनयोः पदयोः विशेषणपदं किम्?
4. नाट्यांशे 'विधीयते' इति क्रियापदस्य कर्तृपदं किम् अस्त

उत्तराणि:

1. विलोक्य
2. वेला
3. समरूपः

4. नियोगः

(च) भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिर्

गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।

कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं,

पुनाति श्रोतारं रमयति च सोऽयं परिकरः॥

**प्रश्न 1.**

एकपदेन उत्तरत **(**केवलं प्रश्नद्वयमेव**)-**

1. श्लोक-रचनायाः कविः कः अस्ति?
2. अयं सन्दर्भः कुत्र प्रथम अवतीर्णः?
3. इयं कथा कीदृशी वर्तते?

उत्तराणि**:**

1. वाल्मीकिः
2. गिराम्
3. श्लाघ्या

**प्रश्न 2.**

पूर्णवाक्येन उत्तरत **(**केवलं प्रश्नमेकमेव**)**

1. इयं कथा कस्मात् सम्बन्धितः?
2. इयं कथा श्रोतारं प्रति किं करोति?

उत्तराणि**:**

1. इय कथा सरसिरुहनाभात् सम्बन्धितः।
2. दयं कथा श्रोतारं पुनाति रमयति च।

**प्रश्न 3.**

भाषिककार्यम् (केवलं प्रश्नत्रयमेव)

1. (i) ‘वाणीम्’ पदस्य पर्यायपदं गद्यांशे किं अस्ति?
2. (ii) श्लाघ्या कथा’ अत्र विशेषणपदं किम्?
3. (iii) रमयति’ इति क्रियापदस्य कर्तृपदं किम्?
4. (iv) श्लोके ‘वक्तारम्’ इति पदस्य विपर्ययपदं किमस्ति?

उत्तराणि:

1. (ग) गिराम्
2. (ग) श्लाघ्या
3. (ख) अयं परिकरः
4. (क) श्रोतारम्

**(छ)** वयस्य**!** अपूर्वोऽयं मानवानां सरस्वत्यवतारः**,** तवह सुहृज्जनसाधारणं श्रोतुमिच्छामि। सन्निधीयन्तां

सभासदः**,** प्रेष्यतामस्मदन्तिकं सौमित्रिः**,** अहमप्येतयोश्चिरासनपरिखेदं विहरणं कृत्वा अपनयामि।

प्रश्न **1.**

एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)**-**

1. कः सुहज्जनसाधारणं श्रोतुम् इच्छति?
2. रामः कम् अन्तिकं प्रेषयितुम् अकथयत्?
3. के सन्निधीयन्ताम्?

उत्तराणि:

1. रामः
2. सौमित्रिम्
3. सभासदः

प्रश्न **2.**

पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-

1. सरस्वत्यवतारः कीदृशः अस्ति?
2. रामः किं विहरणं कृत्वा अपनयितुम् इच्छति?

उत्तराणि:

1. सरस्वत्यवतारः अपूर्वः अस्ति।
2. रामः चिरासन परिखेदं विहरणं कृत्वा अपनयितुम इच्छति।

प्रश्न **3.**

भाषिककार्यम् **(केवलं प्रश्नत्रयमेव)-**

1. अत्र 'सौमित्रिः' पदं कस्मै प्रयुक्तम्?
2. अहमप्येतयोश्चिरासनपरिखेदं' अस्मिन् पदे अव्ययपदं किम्?
3. 'अपनयामि' इति क्रियायाः कर्तृपदं किम्?
4. 'सदस्याः' इत्यस्य पदस्य कः पर्यायः अनुच्छेद लिखितः?

उत्तराणि:

1. लक्ष्मणाय
2. अपि
3. अहम्
4. सभासदः

**2.** निम्नवाक्येषु रेखांकितपदानि आधृत्य विकल्पेभ्यः उचितं पदं चित्वा प्रश्ननिर्माणं कुरुत**-**

**(क)** रामस्य समीपम् उपसृत्य प्रणम्य च।

(i) कम्

(ii) कस्य

(iii) काम्

(iv) कया

उत्तराणि:

(ii) कस्य

**(ख)** रामाय कुशलवयोः कण्ठश्लेषस्य स्पर्शः हृदयग्राही आसीत्**?**

(i) कीदृशः

(ii) कीदृशी

(iii) कीदृशम्

(iv) किम्

उत्तराणि:

(i) कीदृशः

**(ग)** धिङ् माम् एवं भूतम्।

(i) कम्

(ii) काम्

(iii) किम्

(iv) केषाम्

उत्तराणि:

(i) कम्

**(घ)** तस्या द्वे नाम्नी।

(i) के

(ii) कयोः

(iii) कति

(iv) किम्

उत्तराणि:

(iii) कति

**(ङ)** लवः कुशः च भ्रातरौ आस्ताम्।

(i) कः

(ii) कौ

(ii) कीदृशौ

(iv) के

उत्तराणि:

(ii) कौ

**(च)** अपूर्व खलु नामधेयम्।

(i) कम्

(ii) काम्

(iii) कीदृशं

(iv) कीदृशः

उत्तराणि:

(iii) कीदृशं

**(छ)** अतिदीर्घः प्रवासोऽयं दारुणश्च।

(i) क

(ii) कम्

(iii) कीदृशः

(iv) कीदृशं

उत्तराणि:

(iii) कीदृशः

**(ज)** बालभावात् हिमकरः पशुपति-मस्तके विराजते।

(i) क

(ii) के

(iii) कुत्र

(iv) कस्मिन्

उत्तराणि:

(iii) कुत्र

**(झ)** अहमत्रभवतो: जनक नामतो वेदितुमिच्छामि।

(i) किम्

(ii) कम्

(iii) काम्

(iv) कः

उत्तराणि:

(iii) काम्

**(ञ)** समरूपः शरीरसन्निवेशः।

(i) किम्

(ii) कीदृशं

(ii) कीदृशः

(iv) कः

उत्तराणि:

(iii) कीदृशः

**(ट)** न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

(i) कुत्र

(ii) के

(iii) कस्मिन्

(iv) कीदृशे

उत्तराणि:

(i) कुत्र

**(ठ)** अपूर्वोऽयं मानवानां सरस्वत्यवतारः।

(i) कान्

(ii) किम्

(iii) केषाम्

(iv) काम्

उत्तराणि:

(iii) केषाम्

**(ङ)** तपोवनवासिनो देवीति नाम्नाहृवयन्ति।

(i) कः

(ii) के

(ii) केन

(iv) काः

**उत्तराणि:**

(ii) के

**(ढ)** मयापि सम्माननीय एव मुनिनियोगः।

(i) केन

(ii) कया

(ii) के

(iv) का

**उत्तराणि:**

(i) केन

**(ण)** अङ्कव्यवहितम् अध्यास्यतां सिंहासनम्।

(i) किम्

(ii) कम्

(iii) कुत्र

(iv) कीदृशम्

**उत्तराणि:**

(iii) कुत्र

**(त)** सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं भणति।

(i) केन

(ii) कीदृशेन

(iii) किम्

(iv) कान्

उत्तराणि:

(i) केन

**(थ)** उपाध्यायदूताः अस्मान् त्वरयति।

(i) कः

(ii) काम्

(iii) किम्

(iv) कान्

उत्तराणि:

(iv) कान्

**3.** वाक्येषु रेखाकितपदानां स्थाने प्रश्नवाचकं पदं प्रयुज्य प्रश्ननिर्माण कुरुत-

**(क)** अहम् सुहज्जनसाधारणं श्रोतुम् इच्छामि।

उत्तराणि:

अहम् कम् श्रोतुम् इच्छामि?

**(ख)** चन्द्रः शिवस्य शेखरे चूडामणिः इव शोभते।

उत्तराणि:

चन्द्रः कस्य शेखरे चूड़ामणिः इव शोभते?

(ग) एवमेव भवन्तौ गायताम्।

उत्तराणि:

एवमेव को गायताम्?

(घ) श्रोतार: आनन्दिताः भवन्ति।

उत्तराणि:

श्रोतारः कीदृशाः भवन्ति?

(ङ) सा धरायां प्रथमवारमेव अवतरितवती।

उत्तराणि:

सा कस्याम/कुत्र प्रथमवारमेव अवतरितवती?

(च) तयोः उपनयनसंस्कारं भगवान् वाल्मीकिः अकरोत्।

उत्तराणि:

तयोः किम्/कम् भगवान् वाल्मीकिः अकरोत्?

(छ) अहम् तस्य नामधेयम् जानामि।

उत्तराणि:

कः तस्य नामधेयम् जानामि?

**4.** अधोलिखितश्लोकानाम् अन्वयं मञ्जूषातः उचितं पदं चित्वा पूरयत**-**

(क) भवति शिशुजनो वयोऽनुरोधाद्

गुणमहतामपि लालनीय एव।

व्रजति हिमकरोऽपि बालभावात्

पशुपति-मस्तक-केतकच्छदत्वम्।।

अन्वयः

(i) __________ अपि वयोऽनुरोधात् (ii) __________ लालनीयः एवं भवति। बालभावात् हि (iii) __________ अपि पशुपति (iv) __________ केतकच्छदत्वम् व्रजति।

मञ्जूषा- गुणमहताम्, मस्तक, हिमकरः, शिशुजनः

उत्तराणि:

(i) गुणमहताम्

(ii) शिशुजनः

(iii) हिमकरः

(iv) मस्तक

(ख) भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिर्

गिरां सन्दर्भोऽयं प्रथममवतीर्णा वसुमतीम्।

कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं,

पुनाति श्रोतारं रमयति च सोऽयं परिकरः॥

अन्वयः

भवन्तौ (i) _________ पुराणः व्रतनिधिः कविः अपि, वसुमतीम् प्रथम अवतीर्णः (ii) _________ अयं सन्दर्भः सरसिरुहनाभस्य च इयं (iii) _________ कथा, सः च सोऽयं परिकरः नियतं (iv) _________ पनाति रमयति च। मञ्जूषा- श्रोतारं, श्लाघ्या, गायन्तौ, गिराम् ।

उत्तराणि:

(i) गायन्तौ

(ii) गिराम्

(iii) श्लाघ्या

(iv) श्रोतारं

**5.** अधोलिखितश्लोकानाम् भावयुक्तं पदं मञ्जूषात: चित्वा पूरयत-

(क) भवति शिशुजनो वयोऽनुरोधाद्

गुणमहतामपि लालनीय एव।

व्रजति हिमकरोऽपि बालभावात्

पशुपति-मस्तक-केतकच्छदत्वम्॥

भाव:

बालकः स्व स्वाभावात् (i) ________ जनैः अपि तथैव (ii) ________ भवति, यथा केतकी (iii) ________ इव चन्द्रः बालभावत्वेन भगवतः शिवस्य (iv) ________ चुडामणि इव शोभते।

मञ्जूषा- शेखर, लालनीयः, वयोवृद्धैः, पुष्पाणि।

उत्तराणि:

(i) वयोवृद्धैः

(ii) लालनीयः

(iii) पुष्पाणि

(iv) शेखर

(ख) भवन्तो गायन्तौ कविरपि पुराणो व्रतनिधिर्

गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।

कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं,

पुनाति श्रोतारं रमयति च सोऽयं परिकरः।।

भाव:

श्रीरामः (i) ________ वदति यत् भवन्तौ या (ii) ________ गातुम् इच्छतः सा तु व्रतनिधिः पुराणः (iii) ________ भगवान् वाल्मीकिः रचितवान्। अतः सा धरायां प्रथमवारमेव अवतरितवती। इयं कथा कमलनाभि-भगवतः (iv) ________ कथा वर्तते अतः श्रोतारं पुनाति आनन्दितं च करोति। एवमेव भवन्तौ गायताम्।

मञ्जूषा- विष्णोः, कुशलवौ, कविः, कथा

उत्तराणि:

(i) कुशलवौ

(ii) कथा

(iii) कविः

(iv) विष्णो:

**6.** अधोलिखितवाक्यानि घटनाक्रमानुसार पुनर्लिखत**-**

**I. (**क**)** रामः लवकुशौ आसनार्धम् उपवेशयति।

**(**ख**)** सिंहासनारूढः रामः लवकुशयोः सौन्दर्य दृष्ट्वा आकृष्टः भवति।

**(**ग**)** आवाम् यमलौ।

**(**घ**)** तव माता किं कुपिता एवं भणति।

**(**ङ**)** अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।

**(**च**)** समरूप**:** शरीरसन्निवेश**:/**वयसस्तु न किञ्चिदन्तरम्।

**(च)** तस्याः द्वे नामनी।

**(ज)** मम पिता नाम निरनुक्रोशः।

उत्तराणि:

(क) सिंहासनारूढः रामः लवकुशयोः सौन्दर्य दृष्ट्वा आकृष्टः भवति।

(ख) रामः लवकुशौ आसनार्धम् उपवेशयति।

(ग) समरूपः शरीरसन्निवेश:/वयसस्तु न किञ्चिदन्तरम्।

(घ) आवाम् यमलौ।

(ङ) अहमत्रभवतोः जनक नामतो वेदितुमिच्छामि।

(च) मम पिता नाम निरनुक्रोशः।

(च) तव माता किं कुपिता एवं भणति।

(ज) तस्याः द्वे नामनी।

**II. (क)** धिङ् मावेवभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेव निर्भर्त्सयति।

**(ख)** उपनयनोपदेशेन।

**(ग)** जानाम्यहं तस्य नामधेयम्।

**(घ)** अहम् अपि कुश इत्यात्मानं श्रावयामि।

**(ङ)** अहो हृदयग्राही स्पर्शः।

**(च)** मनु भगवान् वाल्मीकिः।

**(छ)** युष्मदद्दर्शनात् कुशलमिव।

**(ज)** आर्यस्य वन्दनाया लव इत्यात्मानं श्रावयामि।

उत्तराणि:

(क) युष्मद्दर्शनात् कुशलमिव।

(ख) अहो हृदयग्राही स्पर्शः।

(ग) आर्यस्य बन्दनायां लव इत्यात्मानं श्रावयामि।

(घ) अहम् अपि कुश इत्यात्मानं श्रावयामि।

(ङ) मनु भगवान् वाल्मीकिः।

(च) उपनयनोपदेशेन।

(छ) जानाम्यहं तस्य नामधेयम्।

(ज) धिङ् मावेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं निर्भर्त्सयति।

**7.** अधोलिखितपदानां तेषाम् पर्यायपदैः च मेलनं कुरुत-

| | पदानि | पर्यायपदानि | | पदानि | पर्यायपदानि |
|---|---|---|---|---|---|
| (क) | यमलौ | हिमकरः | (ख) | सूर्यः | उपाध्यायः |
| (ग) | चन्द्रः | बालः | (घ) | गुरुः | आर्यः |
| (ङ) | वयः | पुत्रौ | (च) | शिशुजनः | देवी |
| (छ) | पशुपतिः | शङ्करः | (ज) | भणति | युगलौ |
| (झ) | रामः | भास्करः | (ञ) | दारकौ | आयुः |
| (ट) | सीता | क्रोऽम् | (ठ) | अङ्कम् | जननी |
| (ड) | प्रतिवचनम् | विचार्य | (ढ) | विचिन्त्य | उत्तरम् |
| (ण) | अम्बा | शिष्टाचारः | (त) | समुदाचारः | कथयति |

उत्तराणि:

| | पदानि | पर्यायपदानि | | पदानि | पर्यायपदानि |
|---|---|---|---|---|---|
| (क) | यमलौ | युगलौ | (ख) | सूर्य: | भास्कर: |
| (ग) | चन्द्र: | हिमकर: | (घ) | गुरु: | उपाध्याय: |
| (ङ) | वय: | आयु: | (च) | शिशुजन: | बाल: |
| (छ) | पशुपति: | शङ्करा: | (ज) | भणति | कथयति |
| (झ) | राम: | आर्य: | (ञ) | दारकौ | पुत्रौ |
| (ट) | सीता | देवी | (ठ) | अङ्कम् | क्रोऽम् |
| (ड) | प्रतिवचनम् | उत्तरम् | (ढ) | विचिन्त्य | विचार्य |
| (ण) | अम्बा | जननी | (त) | समुदाचार: | शिष्टाचार: |

**8. (अ)** विशेषण-विशेष्यपदानि योजयत-

| | विशेषणपदानि | | विशेष्यपदानि |
|---|---|---|---|
| (क) | अलमति | (i) | वनम् |
| (ख) | निरनुक्रोशो | (ii) | पुस्तकालयम् |
| (ग) | सुन्दरम् | (iii) | पर्यटका: |
| (घ) | बृहत्तमम् | (iv) | नाम |
| (ङ) | अधिका | (v) | दाक्षिण्येन |
| (च) | वैदेशिका: | (vi) | उष्णता |

उत्तराणि:

(क) (v), (ख) (iv), (ग) (i), (घ) (ii), (ङ) (vi), (च) (iii)

**(आ)** संस्कृतेन वाक्यप्रयोगं कुरुत-

| | विशेषणपदानि | विशेष्यपदानि | वाक्यानि |
|---|---|---|---|
| (क) | सर्वे | बालकाः – | ........................................................ |
| (ख) | सुन्दर्यः | बालिका – | ........................................................ |
| (ग) | मायावि | मित्रं – | ........................................................ |
| (घ) | महान् | रिपुः – | ........................................................ |

उत्तराणि:

(क) सर्वे बालकाः क्रीडन्ति।

(ख) सुन्दर्यः बालिकाः यत्र यास्यन्ति।

(ग) मायानि मित्रं त्यजेत्।

(घ) मनुष्याणां शरीरस्थः महान् रिपुः आलस्यम्।

**9.** अधोलिखितपदानां तेषाम् विपर्ययपदानि सह मेलनं कुरुत-

| | पदानि | विपर्ययपदानि | | पदानि | विपर्ययपदानि |
|---|---|---|---|---|---|
| (क) | विचार्य | उत्तरम् | (ख) | प्रश्नम् | ग्राही |
| (ग) | सरलताम् | सहृदयः | (घ) | निर्दयः | निशाकरः |
| (ङ) | दिनकरः | आगच्छतः | (च) | निर्गच्छतः | कठिनताम् |
| (छ) | त्यागी | मित्रम् | (ज) | रिपुः | अविचार्य |

उत्तराणि:

| | पदानि | विपर्ययपदानि | | पदानि | विपर्ययपदानि |
|---|---|---|---|---|---|
| (क) | विचार्य | अविचार्य | (ख) | प्रश्नम् | उत्तरम् |
| (ग) | सरलताम् | कठिनताम् | (घ) | निर्दयः | सहृदयः |
| (ङ) | दिनकरः | निशाकरः | (च) | निर्गच्छतः | आगच्छतः |
| (छ) | त्यागी | ग्राही | (ज) | रिपुः | मित्रम् |

NCERT 10th Sanskrit (Shemushi) Chapter 4, class 10 Sanskrit (Shemushi) Chapter 4 solutions

# Chapterwise NCERT Solutions for Class 10 Sanskrit (Shemushi) :


- Chapter 1: शुचिपर्यावरणम्
- Chapter 2-बुद्धिर्बलवती सदा
- Chapter 3-व्यायामः सर्वदा पथ्यः
- Chapter 4-शिशुलालनम्
- Chapter 5-जननी तुल्यवत्सला
- Chapter 6-सुभाषितानि
- Chapter 7-सौहार्दं प्रकृतेः शोभा
- Chapter 8-विचित्रः साक्षी
- Chapter 9-सूक्तयः
- Chapter 10-भूकंपविभीषिका
- Chapter 11-प्राणेभ्योऽपि प्रियः सुह्रद्
- Chapter 12-अनयोक्त्य

# About NCERT

The National Council of Educational Research and Training is an autonomous organization of the Government of India which was established in 1961 as a literary, scientific, and charitable Society under the Societies Registration Act. The major objectives of NCERT and its constituent units are to: undertake, promote and coordinate research in areas related to school education; prepare and publish model textbooks, supplementary material, newsletters, journals and develop educational kits, multimedia digital materials, etc.Organise pre-service and in-service training of teachers; develop and disseminate innovative educational techniques and practices;collaborate and network with state educational departments, universities, NGOs and other educational institutions; act as a clearing house for ideas and information in matters related to school education; and act as a nodal agency for achieving the goals of Universalisation of Elementary Education.In addition to research, development, training, extension, publication and dissemination activities, NCERT is an implementation agency for bilateral cultural exchange programmes with other countries in the field of school education.Its headquarters are located at Sri Aurobindo Marg in New Delhi. Visit the Official NCERT website to learn more.